# संहितास्कन्धे सद्योवृष्टिविमर्शः

डॉ. रामदास शर्मा
सहायकाचार्यः, ज्योतिषविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरणवीरपरिसरः, जम्मू।

**Article Info**
Volume 3 Issue 3
Page Number : 187-191

**Publication Issue :**
May-June-2020

**Article History**
Accepted : 20 May 2020
Published : 30 May 2020

**शोधसारः–** महर्षिणा पराशरेण कृषिपाराशरग्रनथे शनिभौमयोः राशिपरिवर्तनकाले भाविवृष्टेः सम्भावना कथिताः तथा बृहस्पतेरपि राशि परिवर्तनेन वृष्टिकारकः भवति। ग्रहाणामुदयास्तकालेऽपि वृष्टिर्जायते तथा च नक्षत्रेषु ग्रहाणां संक्रमणेन अपि वृष्टिः भवति परन्तु बृहत्संहिताकारेण अस्मिन् विषये सूक्ष्मातिसूक्ष्म चिन्तनं कृतम्। ग्रहनक्षत्रचारग्रहोदयास्तानां काले कृषित्मवृष्टिम् इत्यस्य विस्तृतवर्णनं कृतम्। विष्णुधर्मोत्तरेऽपि नक्षत्रपरिवर्तनेन वृष्टेः फलं कथितम्। अतः समीक्ष्या ज्ञायते यत् पराशरस्य मतस्य अनुसरणं वराहेण कृतं परन्तु अत्यन्तं प्रमाणिकं सूक्ष्मातिसूक्ष्मं विस्तृतवर्णनं च कृतम्।

**मुख्यशब्दाः–** संहितास्कन्धः वृष्टिः भेकः जनः नक्षत्रः पराशरः राशिः।

वृष्टिकाले अचिराज्जायमानायाः वृष्टेः लक्षणानि किञ्चित्कालात् प्रागेव दृश्यन्ते। प्राचीनवृष्टिविज्ञानदृष्ट्या लक्षणानामेतेषां ज्ञानं परमावश्यकम्। सद्योवृष्टिनाम किञ्चितकाल प्रागेव जायमाना वृष्टिः। किञ्चित्कालान्तरं भाविन्या वृष्टेः पूर्वानुभवो यथा पशुपक्षिणां भुवि निवसतां कीटसरीसृपादीनां मत्स्यभेकादीनां जलचराणां प्राणिनां च भवति तथा मानवानां न भवति। प्रश्नद्वारा अपि सद्योवृष्टिऋः ज्ञानम् क्रियते, सद्योवृष्टिज्ञानाय कोऽपि जनः यदि जले जलनिकटे वा प्रश्नं करोति तदा शीघ्रमेव वृष्टिः भवति। सन्दर्भेऽस्मिन् महर्षिणा पराशरेण प्रोक्तं यथा –

**जलस्थो जलहस्तो वा निकटेऽथ जलस्य वा।**
**प्रष्टा पृच्छति वृष्ट्यर्थं वृष्टिः संजायतेऽचिरान्।।**[1]

अर्थात् जलमध्ये तिष्ठत्वा हस्तेजलमादाय अपि च जलस्य सन्निकटे कश्चिद् वृष्टिविषयकप्रश्नं पृच्छति तदा अचिरात् वृष्टिः जायते। अण्डमादय पिपीलिका गच्छन्ति अथवा अकाले मण्डुकाध्वनि कुर्वन्ति तदा शीघ्रमेव वृष्टिः भवति यथोक्तं पराशरेण–

**उत्तिष्ठत्यण्डमादाय यदा चैव पिपीलिका।**
**भेकः शब्दायतेऽकस्मात् तदा वृष्टिर्भवति।।**[2]

अर्थात् पिपीलिका अण्डमादाय निर्गच्छन्ति अथवा भेकः अकस्मात् शब्दायते तदा शीघ्रमेव वृष्टिर्जायते। विडाल–नकुल–सर्पादीनां लक्षणेन सद्योवृष्टिः ज्ञानं जायते, यथोक्तं पराशरेण –

**विडाला नकुलाः सर्पा ये चान्ये वा विलेशयाः।**
**धवन्ति शलभा मत्ताः सद्यो वृष्टिर्भवेद् ध्रुवम्।।**[3]

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अर्थात् यदि विडाल–नकुल–सर्पादीनां बिलनिवासिनां प्राणिनां च शलभादीनां मदमत्तेन धावन्ति तदा शीघ्रमेव वृष्टिर्जायते। बालकः धूलिभिः सेतुबन्धनं कुर्वन्ति, तथा च मयूराः नृत्यन्ति तदा सद्योवृष्टिः भवति। यथोक्तं पराशरेण –

**कुर्वन्ति बालका मार्गे धूलिभिः सेतुबन्धनम्।**

**मयूराश्च नृत्यन्ति सद्यो वृष्टिर्भवेत् ध्रुवम्।।**[4]

अर्थात् बालकाः मार्गे पथि वा धूलिभिः सेतुबन्धनं प्रकुर्वन्ति तथा च मयूराः नृत्यन्ति तदा शीघ्रमेव सद्योवृष्टिर्भवति। अघातवातपीडितमनुष्याणां अङ्गे पीडा भवति वृक्षस्याग्रभागे सर्पं अरोहणं करोति, तदा सद्यो वृष्टिः भवति यथोक्तं पराशरेण –

**आद्यातवातदुष्टानां नृणामङ्गे व्यथा यदि।**

**वृक्षाग्रारोहणं चाहेः सद्योवर्षण लक्षणम्।।**[5]

अर्थात् आघातवायुभ्यां पीडितमानवस्याङ्गो पीडा भवति तथा च सर्पं वृक्षस्याग्रभागे अरोहणं करोति तदा निश्चयेन शीघ्रमेव वृष्टिः कथ्यते। चलचरपक्षिगणान् स्वपक्षयोः सूर्यतापेन शोषयति तथा च आकाशे झिन्झिरनामखगस्य ध्वनिः भवति तदा शीघ्र वृष्टिः भवति। यथोक्तं पराशरेण –

**पक्षयोः शोषणं रौद्रे खगानाम्बुचारिणाम्।**

**झिन्झीरवस्तथाकाशे सद्यो वर्षणलक्षणम्।।**[6]

अर्थात् जलचरपक्षिगणान् स्वपक्षयोः सूर्यतापेन शोषणं कुर्वन्ति तथा च झिन्झीनामकखगस्य गगने कलरवः भवति तदा अचिरादेव वृष्टिः जानीयात्। प्रश्नपृच्छुद्वारा सद्योवृष्टिज्ञानविषये आचार्यवराहमिहिरेणापि प्रोक्तं यथा –

**आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्संज्ञकं वा।**

**तोयासन्नो भवति यदि वा तोयाकार्योन्मुखो वा।**

**प्रष्टा वाच्यः सलिलमचिरादस्ति निःसंशयेन।**

**पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः।।**[7]

भावोऽयं विद्यते यत्– कोऽपि जनः वृष्ट्यर्थं प्रश्नकाले सः व्यक्तिः आर्द्रं द्रव्यं वा स्पृशति अथवा जलं स्पृशति जलसंज्ञकवस्तुविशेषं स्पृशति। जलेस्थितत्वा प्रश्नं करोति अथवा जलसम्बन्धिकार्यसंलग्नः स्यात् प्रश्नकाले जलशब्दं कर्णे श्रूयते तदा शीघ्रमेव वृष्टिः भवति। विडालेन नखैः लिखन्तो तथा च बालकः धूलिभिः सेतुबन्धनं कुर्वन्ति एभिः लक्षणैः दृष्ट्वापि सद्योवृष्टिः भवति सन्दर्भेऽस्मिन् वराहेणापि प्रतिपाद्यते –

**मार्जारा भृशमवनिं नखैर्लिखन्तो।**

**लोहानां मलनिचयः सविस्त्रगन्धः।**

**रथ्यायां शिशुरचिताश्च सेतुबन्धः।**

**सम्प्राप्तं जलमचिरान्निवेदयन्ति।**[8]

भावोऽयं वर्तते यत् – विडालाः भूमिं नखैः लिखन्तः तथा कांस्यानां मलसमूहः सविस्त्रगन्धः सह विस्त्रगन्धेन वर्तते। एवञ्च पथि बालकः सेतुनिर्माणं कुर्वन्ति तदा शीघ्रमेव वृष्टिः भवति। सर्पपिपीलिकापशुलक्षणैः सद्योवृष्टेरनुमानं क्रियते सन्दर्भेऽस्मिन् वराहमिहिराः कथयति यथा –

**विनोपघातेन पिपीलिकानामण्डोपसंक्रान्तिरहिव्यवायः।**

**द्रुमावरोहश्च भुजङ्गमानां वृष्टेर्निर्मितानि गवां प्लुतश्च।।**[9]

अर्थात् पिपीलिकानामुपसर्गेण विना अण्डानामन्यदेशे नयनम्। सर्पाणां मैथुनम्, सर्पाणां वृक्षारोहणम्। तथा सुरभीणां प्लवनम्। एतानि सर्वाणि वृष्टेः कारणानि वर्तन्ते। वर्षाविषयप्रश्नकाले पृच्छुस्थितेः वर्णनं मयूरचित्रकम् नामके ग्रन्थेऽपि प्राप्यते यथा –

**तोये पृष्टे स्पृशति सलिलं वारि कार्योन्मुखो वा।**

**पृच्छाकाले सलिलमिति वा श्रूयते तन्मुखे वा।**

**प्रष्टुर्भयाज्जलमविकल दुर्निरीक्ष्यो हि सूर्यः।**

**प्रातः काले भवति सलिलं स्निग्धवैदूर्य क्रान्ति।।**[10]

भावोऽयं वर्तते यत् प्रातः काले पृष्टुः वृष्टिज्ञानविषयकप्रश्नं यदि जलं स्पृशति अथवा जलकार्यै संलग्ना स्यात् प्रश्नकाले जलमिति शब्दं श्रूयते तथा च प्रातःकाले सूर्यः काठिन्येन दृश्यते, तदा वृष्टिः भवति।

सद्योवृष्टिलक्षणविषये समीक्षाचक्रवर्तिना महामहोपाध्यायेन पण्डितप्रवरेण आचार्येण मधूसूदन–ओझामहाभागेन प्रोक्तं यथा–

**वृष्टिः प्रश्नार्थशकुने श्यामगोघटदर्शनम्**

**स्त्रियां वा श्यामवस्त्रायां दृष्टायां वृष्टिमादिशेत्।**

**जलासन्ना जलं वार्द्रं स्पृश्न् गच्छति तत्क्षणे।**

**श्रूयते जलशब्दो वा न चिराद् वर्णनं वदेत्।।**[11]

भावोऽयं वर्तते यत् – कोऽपि जनः वृष्ट्यर्थं प्रश्नं करोति, तदा प्रश्नकाले श्यामगोघटदर्शनं भवति अथवा श्यमावस्त्रामांस्त्रीदर्शनं भवति तदा वृष्टिर्भवति। वृष्टिविषयकप्रश्नकाले पृष्टुः जलस्य समीपे भवेत् आहोस्वित् जलं स्पृशति, अथवा प्रश्नकाले जलस्य शब्दः श्रूयते तदा शीघ्रमेव वृष्टिः भवति। अयमेव विषयः क्षेत्रीयभाषासु घाघभड्डरीमहोदयोरपि प्रतिपादितम्। यथा –

सद्योवृष्टिलक्षणविषये पराशरेण प्रश्नकाले शकुनस्य विषये स्वमतं स्थापितं यथा– जलासन्ने हस्ते जलमादाय यदि वृष्ट्यर्थ प्रश्नं करोति तदा वृष्टिः भवति। तथा च पिपीलिकादय अण्डमादाय निर्गच्छन्ति तथा मण्डुकः शब्दायते एवञ्च विडाला–नकुल–सर्पादीनां चेष्टवशात् अपि सद्योवृष्टिः भवति यदि बालकः धूलिभिः सेतुबन्धनं कुर्वन्ति तदा शीघ्रमेव वृष्टिः भवति। मनुष्यानामङ्गे पीडा भवति, तदा शीघ्रमेव वृष्टिर्भवति। खगा स्वपक्षयोः सूर्यतापेन शोषणं कुर्वन्ति तदा शीघ्रमेव वृष्टिः भुवति आचार्येण वराहमिहिरेणापि वृष्ट्यर्थं प्रश्नविषये आचार्येण पराशरेण सह साम्यं भवति, मयूरचित्रकग्रन्थकाररपि वृष्टिप्रश्नविषये उभयोः आचार्यो सह साम्यं भवति। कादम्बिनीकारः अपि सर्वेषां आचार्याणां अनुकरणं कृतम्, अतः समीक्ष्या ज्ञायते यत् पराशरेण मन्त्रवत् अल्पशब्दैः सम्पूर्णविषयं प्रतिपादितं, आचार्येण वराहेण अधिकं प्रतिपादितम्।

**ग्रहसञ्चारे वृष्टिज्ञानम् –** ग्रहाणां एकराशितः अपरराशिगमनं सञ्चरणनाम्नाभिधीयते। ग्रहाणां सञ्चरणेन आकाशीयपदार्थेषु पिण्डेषु च विशिष्टघटना जायते परिवर्तनं वा जायते, तेन परिवर्तनेन जलवायुपरिवर्तनं भवति, जलवायुपरिवर्तने क्वचित् स्थलेषु वृष्टिः क्वचिद् स्थलेषु आवृष्टिः भवति, यदा कदा वृष्टिः अवृष्टिरपि भवति केचन ग्रहाः राशिपरिवर्तनेन वृष्टिं करोति केचन् ग्रहा राशिपरिवर्तनेन अवृष्टिं करोति, परन्तु अत्र राशिपरिवर्तनेन हि न वृष्टिमवृष्टिं ज्ञानं भवति, अपितु ग्रहाणामुदयास्तेन अपि वृष्टिः अनावृष्टिः जायते, भौमशनिश्चरयोः राशिपरिवर्तनेन वृष्टिः भवति यथोक्तं महर्षिणा पराशरेण यथा –

**चलत्यङ्गारके वृष्टिर्धुवा वृष्टिः शनैश्चरैः।**

**वारिपूर्णा महीं कृत्वा पश्चात् संचरते गुरुः।।**[12]

अर्थात् भौमशनिश्चरयो: एकराशित: अपरराशिगमनेन अथवा एकराशित: अपरराशिगमनकाले निश्चयेन वृष्टि: भवति तथा च गुरो: एकराशित: अपरराशिपरिवर्तनं करोति तस्मिन् कालेऽपि भूमिं जलपरिपूर्णा भवति अर्थात् वृष्टि: बवति। ग्रहाणामुदयास्तकाले ग्रहाणां वक्रत्वे अवक्रत्वे च वृष्टे: फलं प्रोक्तं पराशरेण –

**ग्रहाणमुदये चास्ते तथा वक्रातिचारयो:।**

**प्रायो वर्षन्ति हि घना नृपाणामुद्यमेषु च।।**[13]

अर्थात् ग्रहाणामुदयास्तकाले ग्रहाणां वक्रत्वकाले ग्रहाणामतिचारेण च मेघा: वर्षन्ति तथा च नृपाणामुद्यमेषु वृष्टि: भवति। ग्रहाणां नक्षत्रपरिवर्तनेन वृष्टे: अनुमानं कथ्यते पराशरेण –

**चित्रामध्यगते जीवे भिन्नभाण्डमिव स्तवेत्।**

**तत: स्वातिं समासाद्य महामेघान् विमुञ्चति।।**[14]

अर्थात् बृहस्पते: चित्रानक्षत्रस्य मध्ये सति मेघै: छिद्रयुक्तपात्रमिव जलं स्रवेत्। तत्पश्चात् गुरो: स्वातिनक्षत्रे समायाति महामेघान् विमुञ्चति अर्थात् महावृष्टि: भवति। स्वातिनक्षत्रे श्रवणनक्षत्रे च जनितं मेघानां विमुञ्चनं पुष्यरेवतीनक्षत्राभ्यां भवति यथोक्तं पराशरेण –

**पुष्येणोपचितान् मेघान् स्वातिरेका व्यपोहति।**

**श्रवणे जनितं वर्षं रेवत्येका विमुञ्चति।।**[15]

अर्थात् एकमात्रस्वातिनक्षत्रमेव पुष्यनक्षत्रे पुष्टमेघान् विमुक्तं करोति। एवञ्च एकमात्ररेवतीनक्षत्रं श्रवणनक्षत्रे जनतिमेघान् विमुक्ता करोति। सन्दर्भेऽस्मिन् बृहत्संहितायामपि प्राप्यते यथा –

मध्ये न यदि मघानां गतागतं लोहित करोति तत:।

पाण्ड्यो नृपो विनश्यति शस्त्रोद्योगादभयमवृष्टि:।।[16]

भाव: अयं वर्तते यत् भौम: यदि मघानक्षत्रे गत्वा वक्री भवति तदा पाण्डुदेशस्य राजा नाशं भवति तथा अनावृष्टि: भवति। नक्षत्रसंक्रमणेन अपि वृष्टे: अनुमानं कृत्वा मिहिरेण यथा –

प्राजापत्ये श्रवणे मूले त्रिषु चोत्तरेषु शाक्रे च।

विचरन् धननिवदानामुवपघातकर: समा तनय:।।[17]

भावोऽयं वर्तते यत् भौम: यदा रोहिणी–मूल–श्रवण–उत्तराषाढ–उत्तराश्रावण–उत्तराभाद्रपद–ज्येष्ठानक्षत्रेषु कुत्रापि सञ्चरणं करोति तदा मेघानां नाशं करोति। अयमेव प्रसङ्ग: विष्णुधर्मोत्तरे प्राप्यते यथा–

ध्रुवेषु वैष्णवे मूले शाक्रे च विचरन् कुज:।

श्रघोरां करोत्यनावृष्टिं कृत्तिकासु मघासु च।।[18]

भावोऽयं विद्यते यत् ध्रुवेषु श्रवण–मूल–ज्येष्ठा–कृत्तिका–मघानक्षत्रेषु संक्रमणं करोति तदा अनावृष्टि: भवति। क्षेत्रीयहिन्दीभाषायामपि प्राप्यते यथा–

आगे मंगल पीछे भान वर्षा होवे ओस समान।

महर्षिणा पराशरेण कृषिपाराशरग्रनथे शनिभौमयो: राशिपरिवर्तनकाले भाविवृष्टे: सम्भावना कथिता: तथा बृहस्पतेरपि राशि परिवर्तनेन वृष्टिकारक: भवति। ग्रहाणामुदयास्तकालेऽपि वृष्टिर्जायते तथा च नक्षत्रेषु ग्रहाणां संक्रमणेन अपि वृष्टि: भवति परन्तु बृहत्संहिताकारेण अस्मिन् विषये सूक्ष्मातिसूक्ष्म चिन्तनं कृतम्। ग्रहनक्षत्रचारग्रहोदयास्तानां काले कृषित्मवृष्टिम् इत्यस्य विस्तृतवर्णनं कृतम्। विष्णुधर्मोत्तरेऽपि नक्षत्रपरिवर्तनेन वृष्टे: फलं कथितम्। अत: समीक्ष्या ज्ञायते यत् पराशरस्य मतस्य अनुसरणं वराहेण कृतं परन्तु अत्यन्तं प्रमाणिकं सूक्ष्मातिसूक्ष्मं विस्तृतवर्णनं च कृतम्।

सन्दर्भग्रन्थसूची


1. कृषिपाराशरः, वृष्टिखण्डः, श्लोक- 56
2. कृषिपाराशरः, वृष्टिखण्डः, श्लोक- 57
3. कृषिपाराशरः, वृष्टिखण्डः, श्लोक- 58
4. कृषिपाराशरः, वृष्टिखण्डः, श्लोक- 51
5. कृषिपाराशरः, वृष्टिखण्डः, श्लोक- 52
6. कृषिपाराशरः- श्लोक ,कृषिखण्डः ,53
7. बृहत्संहिता, सद्योवर्षणाध्यायः, श्लोक - 2
8. बृहत्संहिता, सद्योवर्षणाध्यायः, श्लोक -7
9. मयूरचित्रकम्, वृष्टिलक्षणाध्यायः श्लोक - 4
10. मयूरचित्रकम्, वृष्टिलक्षणाध्यायः श्लोक - 4
11. कादम्बनी, पृष्ठ-220
12. कृषिपाराशरः, वृष्टिखण्डः, श्लोकः 62
13. कृषिपाराशरः, वृष्टिखण्डः, श्लोकः 63
14. कृषिपाराशरः, वृष्टिखण्डः, श्लोकः 64
15. कृषिपाराशरः, वृष्टिखण्डः, श्लोकः 65
16. बृहत्संहिता, भौमचाराध्यायः, श्लोक- 8
17. तत्रैव, श्लोक - 65
18. विष्णुधर्मोत्तरस्य वचनमुद्धत, अद्भुतसागरः, पृष्ठ - 16